ॐ

॥ श्री गुरुभ्यो नमः ॥

॥ आत्मार्पणस्तुतिः ॥

(श्रीमदप्पय्यदीक्षित विरचिता)

ஆத்மார்பண ஸ்துதி

(அப்பய்ய தீக்ஷிதர் எழுதியது)

*** देवदेव प्रभावकथनम् ***

कस्ते बोधुं प्रभवति परं देवदेव प्रभाव
यस्मादित्थं विविधरचना सृष्टिरेषा बभूव ।
भक्तिग्राह्यस्त्वमसि तदपि त्वामहं भक्तिमात्रात्
स्तोतुं वाञ्छाम्यतिमहदिदं साहसं मे सहख ॥ १ ॥

*** जगत्स्रष्टृस्वरूपविचारः ***

क्षित्यादीनामवयववतां निश्चितं जन्म तावत्
तन्नास्त्येव क्वचन कलितं कर्त्रधिष्ठानहीनम् ।
नाधिष्ठातुं प्रभवति जडो नाप्यनीशच भावः
तस्मादाद्यस्त्वमसि जगतां नाथ जाने विधाता ॥ २ ॥

*** सर्वदेवोत्तरत्वकथनम् ***

इन्द्रं मित्रं वरुणमनिलं पद्मजं विष्णुमीशं
प्राहुस्ते ते परमशिव ते मायया मोहितास्त्वाम् ।
एतैः सार्धं सकलमपि यच्छक्तिलेशे समाप्तं
स त्वं देवः श्रुतिषु विदितः शम्भुरित्यादिदेवः ॥ ३ ॥

* श्रीसोमलोकाख्यशिवस्थानवर्णनम् *

आनन्दान्धेः किमपि च घनीभावमास्थाय रूपं
शच्या सार्धं परमसुमया शाश्वतं भोगमिच्छन् ।
अध्वातीते शुचिदिवसकृत्कोटि दीप्रे कपर्दिन्
आद्ये स्थाने विहरसि सदा सेव्यमानो गणेशैः ॥ ४ ॥

* स्वस्वोचिताचारैः शिवप्रीणनम् *

त्वं वेदान्तैर्विविधमहिमा गीयसे विश्वनेतः
त्वं विप्राद्यैर्वरद निखिलैरिज्यसे कर्मभिः स्वैः ।
त्वं दृष्टानुश्र विकविषयानन्दमात्रावितृष्णैः
अन्तर्ग्रन्थिप्रविलयकृते चिन्त्यसे योगिवृन्दैः ॥ ५ ॥

ध्यायन्तस्त्वां कृतिचन भवं दुस्तरं निस्तरन्ति
त्वत्पादाब्जं विधिवदितरे नित्यमाराधयन्तः ।
अन्ये वर्णाश्रमविधिरताः पालयन्तस्त्वदाज्ञां
सर्वं हित्वा भवजलनिधावेष मज्जामि घोरे ॥ ६ ॥

* स्ववंशकीर्तनम् *

उत्पद्यापि स्मरहर महत्युत्तमानां कुलेऽस्मिन्
आस्वाद्य त्वन्महिमजलधेरप्यहं शीकराणून् ।
त्वत्पादार्चाविमुखहृदयश्चापलादिन्द्रियाणां
व्यग्रस्तुच्छेष्वहह जननं व्यर्थयाम्येष पापः ॥ ७ ॥

* शिवपूजासाधनसौलभ्यशंसनम् *

अर्कद्रोणप्रभृतिकुसुमैरर्चनं ते विधेयं
प्राप्यं तेन स्मरहर फलं मोक्षसाम्राज्यलक्ष्मीः ।
एतज्जानन्नपि शिव शिव व्यर्थयन्कालमात्मन्
आत्मद्रोही करणविवशो भूयसाऽधः पतामि ॥ ८ ॥

* विषयप्रतिबन्दिनिरूपणम् *

किं वा कुर्वे विषमविषयस्वैरिणा वैरिणाहं
बद्धः स्वामिन् वपुषि हृदयग्रन्थिना सार्धमस्मिन् ।
उक्ष्णा दर्पज्वरभरजुषा साकमेकत्र बद्धः
श्राम्यन्वत्सः स्मरहर युगे धावता किं करोतु ॥ ९ ॥

* अनितरगतित्वाभिधानम् *

नाहं रोधु करणनिचयं दुर्नयं पारयामि
स्मारं स्मारं जनिपथरुजं नाथ सीदामि भीत्या |
किं वा कुर्वे किमुचितमिह क्वाद्य गच्छामि हन्त,
त्वत्पादाब्जप्रपदनम्रते नैव पश्याम्युपायम् ॥ १० ॥

* शिवचरणप्रपदनेन प्रसादाभ्यर्थनन् *

उल्लङ्घयाज्ञामुडपतिकलाचूड ते विश्ववन्द्य
त्यक्ताचार : पशुवदधुना मुक्तलजश्चरामि ।
एवं नानाविधभवततिप्राप्तदीर्घापराधः
केशाम्भोधि कथमहमृते त्वत्प्रसादात्तरेयम् ॥ ११ ॥

* भाव्यपराध संभावनया नित्रपत्वनिवेदनपूर्वक - प्रार्थना *

साम्यस्येव त्वमिह करुणासागरः कृत्स्नमागः
संसारोत्थं गिरिश समयप्रार्थनादैन्यमात्रात् ।
यद्यप्येवं प्रतिकलमहं व्यक्तमांगः सहस्रं
कुर्वन् मूर्खः कथमिव तथा निस्त्रपः प्रार्थयेय ।। १२ ।।

* मृतिसमयदोषभूयिष्ठध्बुद्धिपारतन्त्र्यकथनम् *

सर्व क्षेप्तुं प्रभवति जनः संसृतिप्राप्तमागः
चेतः श्वासप्रशमसमये त्वत्पदाब्जे निधाय ।
तस्मिन्काले यदि मम मनो नाथ दोषत्रयात
प्रज्ञाहीनं पुरहर भवेत्तत्कथं मे घटेत ॥ १३ ॥

* उत्क्रान्त्यवस्थानिरूपणम् *

प्राणोत्क्रान्तिव्यतिकरदलत्सन्धिबन्धे शरीरे
प्रेमावेशप्रसरदमिताक्रन्दिते बन्धुवर्गे ।
अन्तः प्रज्ञामपि शिव भजन्नन्तरायैरनन्तैः
आविद्धोऽहं त्वयि कथमिमामर्पयिष्यामि बुद्धिम् ॥ १४ ॥

* सद्यः स्वात्मसमर्पणम् *

अद्यैव त्वत्पदनलिनयोरर्पयाम्यन्तरात्मन्
आत्मानं मे सह परिकरैरद्रिकन्याधिनाथ |
नाहं बोद्धुं तव शिव पदं न क्रिया योगचर्याः
कर्तुं शक्नोम्यनितरगतिः केवलं त्वां प्रपद्ये ॥ १५ ॥

* सर्वगुरुत्वनिरूपणपूर्विका प्रपत्तिः *

यः स्रष्टारं निखिलजगतां निर्ममे पूर्वमीशः
तस्मै वेदानदित सकलान्यश्च साकं पुराणैः ।
तं त्वामाद्यं गुरुमहमसावात्मबुद्धिप्रकाशं
संसारातः शरणमधुना पार्वतीशं प्रपद्ये ॥ १६ ॥

* पति पशु पाश निरूपणपूर्विका प्रपत्तिः *

ह्यादीन् यः सरहर पशून्मोहपाशेन बद्ध्वा
सर्वानेकश्चिदचिदधिकः कारयित्वाऽऽत्मकृत्यम् ।
यते स्वपदशरणान्विद्यया मोचयित्वा
सान्द्रानन्दं गमयति परं धाम तं त्वां प्रपद्ये ॥ १७ ॥

* भवरोगभिषग्वरणं *

भक्ताग्रयाणां कथमपि परैः योऽचिकित्स्याममर्त्यैः
संसाराख्यां शमयति रुजं स्वात्मबोधौषधेन ।
तं सर्वाधीश्वर भवमहादीर्घतीव्रामयेन
क्लिष्टोऽहं त्वां वरद शरणं यामि संसारवैद्यम् ॥ १८ ॥

* तीरकोपदेष्टृत्वकथनपूर्वकं शरणवरणम् *

ध्यातो यत्नाद्विजितकरणयोंगिभिर्यो विमुक्त्यै (विमृग्यः)
तेभ्यः प्राणोत्क्रमणसमये संनिधायात्मनैव ।
तद्व्याचष्टे भवभयहरं तारकं ब्रह्म देवः
तं सेवेऽहं गिरिश सततं ब्रह्मविद्यागुरुं त्वाम् ॥ १ ९ ॥

* नित्यदासता निरूपणम् *

दासोऽस्मीति त्वयि शिव मया नित्यसिद्धू निवेद्यं
जानास्येतवमपि यदहं निर्गतिः संभ्रमामि |
नास्त्येवान्यन्मम किमपि ते नाथ विज्ञापनीयं
कारुण्यान्मे शरणवरणं दीनवृत्तेर्गृहाण ॥ २० ॥

* दीनदयानिधित्वमवलम्ब्य प्रार्थना *

ब्रह्मोपेन्द्रप्रभृतिभिरपि स्वेप्सितप्रार्थनाय
स्वामिन्नग्रे चिरमवसरस्तोषयद्भिः प्रतीक्ष्यः ।
द्रागेव त्वां यदिह शरणं प्रार्थये कीटकल्पः
तद्विश्वाधीश्वर तव कृपामेव विश्वस्य दीने ॥ २१ ॥

* प्रपदनोपायप्राप्तेः धैर्यावलम्बनम् *

कर्मज्ञानप्रचयमखिलं दुष्करं नाथ पश्यन्
पापासक्तं हृदयमपि चापारयन्सन्निरोद्धुम् ।
संसाराख्ये पुरहर महत्यन्धकूपे विषीदन्
हस्तालम्बप्रपदनमिदं प्राप्य ते निर्भयोऽस्मि ॥ २२ ॥

* जनिमार्गसहायत्वकथनम् *

त्वामेकं हतजनिपथे पान्थमस्मिन्प्रपञ्चे
मत्वा जन्मप्रचयजलधेः बिभ्यतः पारशून्यात् ।
यत्ते धन्याः सुवर मुखं दक्षिणं संश्रयन्ति
क्लिष्टं घोरे चिरमिह भवे तेन मां पाहि नित्यम् ॥ २३ ॥

* क्लेशदैन्यनिरूपणपूर्विका प्रपत्तिः *

एकोऽसि त्वं शिव जनिमतामीश्वरो बन्धमुक्त्योः
केशाङ्गारावलिषु लुंठतः का गतिस्त्वां विना मे
तस्मादस्मिन्निह पशुपते घोरजन्मप्रवाहे
खिन्न दैन्याकरमतिभयं मां भजस्व प्रपन्नम् ॥ २४ ॥

* श्रीरुद्रप्रभावकथनपूर्विका विद्याप्रार्थना *

यो देवानां प्रथममशुभद्रावको भक्तिभाजां
पूर्व विश्वाधिक शतवृतिं जायमानं महर्षिः ।
दृष्ट्यापश्यत्सकलजगतीसृष्टिसामर्थ्यदाज्या
स त्वं ग्रन्थिप्रविलयकृते विद्यया योजयास्मान् ॥ २५ ॥

* दुःखतनरणस्य शिवज्ञानैकमूलत्वकथनम् *

यद्याकाशं शुभद मनुजाचर्मवद्वेष्टयेयुः
दुःखस्यान्तं तदपि पुरुषस्त्वामविज्ञाय नैति ।
विज्ञानं च त्वयि शिव ऋते त्वत्प्रसादान्न लभ्यं
तद्दुःखार्तः कमिह शरणं यामि देवं त्वदन्यम् ॥ २६ ॥

* शिवप्रसादाद्विद्याया मोक्षसाधनत्वकथनम् *

किं गूढार्थैरकृतकवचोगुम्फनैः किं पुराणैः
तन्त्राद्यैर्वा पुरुषमतिमिर्दुर्निरूप्यैकमत्यैः ।
किं वा शास्त्रैरफलकल होल्लासमात्र प्रधानैः
विद्या विद्येश्वर कृतधियां केवलं त्वत्प्रसादात् ॥ २७ ॥

* शरणागतदीनोपेक्षणमयुक्तमिति प्रार्थना *

पापिष्ठोऽहं विषयचपलः सन्ततद्रोहशाली
कार्पण्यैकस्थिरनिवसतिः पुण्यगन्धानभिज्ञः ।
यद्यप्येवं तदपि शरण त्वत्पदाब्जं प्रपन्न
नैनं दीनं स्मरहर तवोपेक्षितुं नाथ युक्तम् ॥ २८ ॥

* अनङ्गीकारेऽगतिकत्वकथनम् *

आलोच्यैवं यदि मयि भवान् नाथ दोषाननन्तान्
अस्मत्पादाश्रयणपदवी नार्हतीति क्षिपेन्माम् ।
अद्यैवेमं शरणविरहाद्विद्धि भीत्यैव नष्टं
ग्रामो गृहत्याहिततनयं किं नु मात्रा निरस्तम् ॥ २ ९ ॥

* भरन्यासपूर्वकप्रार्थना *

क्षन्तव्यं वा निखिलमपि मे भूतभावि व्यलीकं
दुर्व्यापारप्रवणमथवा शिक्षणीयं मनो मे ।
न त्वेवार्त्या निरतिशयया त्वत्पदाब्जं प्रपन्नं
त्वद्वन्यस्ताखिलभरममुं युक्तमीश प्रहातुम् ॥ ३० ॥

* सर्वज्ञत्वदयानिधित्वादिकारणोपपादनम् *

सर्वज्ञस्त्वं निरुपधिकृपासागरः पूर्णशक्तिः
कस्मादेनं न गणयसि मामापदब्धौ निमग्नम् ।
एक पापात्मकमपि रुजा सर्वतोऽत्यन्तदीनं
जन्तुं यद्युद्धरसि शिव कस्तावतातिप्रसङ्गः ॥ ३१ ॥

* क्षण्णा चैवं प्रार्थनारीतिरित्याह *

अत्यन्तार्तिव्यथितमगतिं देव मामुद्धरेति
क्षुण्णो मार्गस्तव शिव पुरा केन वाऽनाथनाथ |
कामालम्बे बत तदधिकां प्रार्थनारीतिमन्यां
त्राय स्वैनं सपदि कृपया वस्तुतवं विचिन्त्य ॥ ३२ ॥

*** जीवेश्वरवस्तुतस्वनिरूपणं, आत्मनो मर्कटत्वनिरूपणं च ***

एतावन्तं भ्रमणनिचयं प्रापितोऽयं वराकः
श्रान्तः स्वामिन्नगतिरधुना मोचनीयस्त्वयाहम् ।
कृपाकृत्यव्यपगतमतिर्दीन शाखामृगोऽयं
संताड्यैनं दशनविवृतिं पश्यतस्ते फलं किम् ॥ ३३ ॥

* ईशकृपाप्राप्तिभाग्याभावहेतुप्रश्नः *

माता तातः सुत इति समाबध्य मां मोहपाशै
रापात्यैवं भवजलनिधौ हा किमीश त्वयाऽऽतम् ।
एतावन्तं समयमियतीमार्तिमापादितेऽस्मिन्
कल्याणी ते किमिति न कृपा कापि मे भाग्यरेखा ॥३४ ॥

* जीवेश्वरदायविभागविवादः

भुङ्क्षे गुप्तं बत सुखनिधिं तात साधारणं त्वं
भिक्षावृत्तिं परममिनयन्मायया मां विभज्य ।
मर्यादायाः सकलजगतां नायकः स्थापकस्त्वं
युक्तं किं तद्वद विभजनं योजयस्वात्मना माम् || ३५ ||

* भक्तपादधूलिभिः आसनः शरीरारम्भप्रार्थना *

न त्वा जन्मप्रलयजलधेरुद्धरामीति चेद्धीः
आस्तां तन्मे भवतु च जनिर्यत्र कुत्रापि जातौ ।
त्वद्भक्तानामनितरसुखैः पादधूलीकिशोरैः
आरब्धं मे भवतु भगवन् भावि सर्वं शरीरम् || ३६ ॥

* कीटादिजन्मप्राप्तावपि ईश्वरचरणान्तिकस्थितिप्रार्थना –

कीटा नागास्तरव इति वा किं न सन्ति स्थलेषु
त्वत्पादाम्भोरुहपरिमलोद्वाहिमन्दानिलेषु ।
तेष्वेकं वा सृज पुनरिमं नाथ दीनार्तिहारिन्
आतोषान्मां मृड भवमहाङ्गारनद्यां लुठन्तम् || ३७ ॥

* आत्मनः चरमसमयेऽपीश्वरस्मृतिप्रार्थना *

काले कण्ठस्फुरद सुकलालेशसत्तावलोक
व्याग्रोदग्रव्यसनरुदित स्निग्धरुद्धोपकण्ठे ।
अन्तस्तोदैरवधिरहितामार्तिमापाद्यमानेऽ
प्यन्त निविशतामन्तरात्मन्ममात्मा ॥ ३८ ॥

* एतत्प्रार्थनादृढीकरणम् *

अन्तर्बाष्पाकुलितनयनानन्तरङ्गानपश्यन्
अग्रे घोषं रुदितबहुलं कातराणमशृण्वन् ।
अत्युत्क्रान्तिश्रममगणयन्नन्तकाले कपर्दिन्
अविद्वन्द्वे तव निविशतामन्तरात्मन्ममात्मा ॥ ३ ९ ॥

* ईश्वरप्रत्यक्षानुभवः *

चारुस्मेराननसरसिजं चन्द्ररेखावतंसं
फुल्लन्मल्ली कुसुमकलिकादामसौभाग्यचोरम् ।
अन्तः पश्याम्यचलसुतया रत्नपीठे निषण्णं
लोकातीतं सततशुभदं रूपमप्राकृतं ते ॥ ४० ॥

* प्रार्थनादौर्लभ्यान्निर्वेदः *

स्वप्ने वापि स्वरसविकसद्दिव्यपङ्केरुहाभं
पश्येयं किं तव पशुपते पादयुग्मं कदाचित् ।
काहं पापः क्व तव चरणालोकभाग्यं तथापि
प्रत्याशां मे घटयति पुनर्विश्रुता तेऽनुकम्पा ॥ ४१ ॥

* भिक्षाचर्यादिकापट्यनिरूपणम् *

मिक्षावृत्ति चर पितृवने भूतसङ्घैर्भमेदं
विज्ञातं ते चरितमखिलं विप्रलिप्सो : कपालिन् ।
आवैकुण्ठ हिणमखिलप्राणिनामीश्वरस्त्वं
नाथ स्वप्मेऽप्यहमिह न ते पादपद्मं त्यजामि ॥ ४२ ॥

* ईश्वरस्य ऐश्वर्य श्रुतिसिद्धम् *

आलेपनं भसितमावसथः श्मशानम्
अस्थीनि ते सततमाभरणानि सन्तु ।
निहो तुमीश निखिलश्रुतिसारसिद्धम्
ऐश्वर्यमम्बुजभवोऽपि च न क्षमस्ते ॥ ४३ ॥

*** शिवानुचरभृत्यभावाभ्यर्थनम् ***

विहर पितृवने वा विश्वपारे पुरे वा
रजतगिरितटे वा रत्नसानुस्थले वा ।
दिश भवदुपकण्ठं देहि मे भृत्यभाव
परमशिव तव श्रीपादुकावाहकानाम् ॥ ४४ ॥

* अर्थवादस्तुत्सामरानीश्वरत्वकथनम् *

विविधमपि गुणौघं वेदयन्त्यर्थवादाः
परिमितविभवानां पामराणां सुराणाम् ।
तनुहिमकरमौले तावता तत्परत्वे
कति कति जगदीशाः कल्पिता नो भवेयुः ॥ ४५ ॥

*** ब्रह्मादिभिः निष्कृष्टं शिवपारम्यम् ***

बलमबलममीषां बल्बजानां विचिन्त्यं
कथमपि शिव कालक्षेपमात्रप्रधानैः ।
निखिलमपि रहस्यं नाथ निष्कृष्य साक्षात्
सरसिजभवमुख्यैः साधितं नः प्रमाणम् ॥ ४६ ॥

*** शिवपदाब्जमन्तरा नान्यत्र मे स्पृहा ***

न किंचिन्मेनेऽतः समभिलषणीयं त्रिभुवने
सुखं वा दुःखं वा मम भवतु यद्वावि भगवन् ।
समुन्मीलत्पाथो रुह कुहरसौभाग्यमुषि ते
पदद्वन्द्वे चेतः परिचयमुपेयान्मम सदा ॥ ४७ ॥

*** हीनस्तुत्युच्छिष्टभावक्षमापणम् ***

उदरभरणमात्रं साध्यमुद्दिश्य नीचे
वसकृदुपनिवद्धामाहितोच्छिष्टभावाम् ।
अहमिह नुतिभङ्गीमर्पयित्वोपहारं
तव चरणसरोजे तात जातोऽपराधी ॥ ४८ ॥

* सर्वापराधक्षमापणम् *

सर्व सदाशिव सहस्व ममापराधं
म समुद्धर महत्यमुमापदब्धौ ।
सर्वात्मना तव पदाम्बुजमेव दीनः
स्वामिन्ननन्यशरणः शरणं गतोऽस्मि ॥ ४ ९ ॥

* स्तुतिसमर्पणपूर्वकं प्रार्थना *

आत्मार्पणस्तुतिरियं भगवन्निवद्धा
यद्यप्यनन्यमनसा न मया तथापि ।
वाचापि केवलमयं शरणं वृणीते
दीनों बराक इति रक्ष कृपानिधे माम् ॥ ५० ॥
